# Sharmavatikritam Parvati Stotram 8

# શર્મવતીકૃતં પાર્વતીસ્તોત્રમ્ ૮

## Document Information

Text title : Sharmavatikritam Parvati Stotram 8

File name : sharmavatIkRRitaMpArvatIstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, pArvatI, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 490/80-92||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# શર્મવતીકૃતં પાર્વતીસ્તોત્રમ્ ૮

“નમસ્તે શાઙ્કરિ રક્ષાકરિ પ્રાણાતિવલ્લભે ॥ ૮૦॥

સર્વકામપ્રદે સત્યે ભક્તાયા હૃદયઙ્ગમે ।
નમસ્તેઽષ્ટગુણૈશ્વર્યવત્યૈ સત્યૈ નમો નમઃ ॥ ૮૧॥

ધ્યાયન્તિ યોગિનસ્ત્વાં ચાર્ચયન્તિ સ્નેહવસ્તુભિઃ ।
સમ્યગ્ભાવાત્મકૈઃ પુષ્પૈરર્ચયામિ મહેશ્વરિ” ॥ ૮૨॥

ઇત્યુક્ત્વા પ્રણનામાથ પાર્વતી તામુવાચ હ ।
પરિતુષ્ટાઽસ્મિ તે પુત્રિ વરં પ્રાર્થય વાઞ્છિતમ્ ॥ ૮૩॥

વિષકન્યા તદોવાચ સર્વં જાનાસિ ચેશ્વરિ ।
ભર્તુરર્થે મયા સર્વઃ કૃતોઽયં તપઉદ્યમઃ ॥ ૮૪॥

તત્કિં તેન કરિષ્યામિ સામ્પ્રતં જરયાઽઽવૃતા ।
વસાઽત્ર પાર્વતિ નિત્યં કન્યાનાં શુભદા ભવ ॥ ૮૫॥

ઇત્યુક્તા પાર્વતી તથાસ્ત્વિતિ પ્રાહ તતઃ પરમ્ ।
પસ્પર્શ પાણિના કન્યાં ચકાર નવયૌવનામ્ ॥ ૮૬॥

ઉવાચોનષોડશાબ્દાં દિવ્યા ચમ્પકસદૃશીમ્ ।
વદ કન્યે વરારોહે કિમિષ્યતે તતઃ પરમ્ ॥ ૮૭॥

કન્યાઽઽહ માતઃ શમ્ભોર્મે દર્શનં કારય પ્રભોઃ ।
સતી પ્રાહ સમાગચ્છ કૈલાસં સિંહસંસ્થિતા ॥ ૮૮॥

ઇત્યુક્તા સા શર્મવતી યયૌ કૈલાસમેવ તુ ।
દૃષ્ટ્વા ચ શઙ્કરં સાધ્વી લબ્ધ્વા મન્ત્રં તુ વૈષ્ણવમ્ ॥ ૮૯॥

“ૐ નમઃ શ્રીકૃષ્ણનારાયણાય સ્વામિને નમઃ” ।
કણ્ઠે ચ તુલસીમાલાં ગૃહીત્વા સાત્ત્વતી તદા ॥ ૯૦॥

અભવદ્વૈષ્ણવી કન્યા નારાયણપરાયણા ।

અન્તે નારાયણં લબ્ધ્વા પતિં મુક્તિં જગામ સા ॥ ૯૧॥

ઇત્યેવં કથિતં લક્ષ્મિ! શર્મવત્યાઃ શુભાવહમ્ ।
તાપસ્યાઃ શુક્લચરિતં વિષકન્યાતપઃ પરમ્ ॥ ૯૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૪૯૦-અધ્યાયાન્તર્ગતં
શર્મવતીકૃતં પાર્વતીસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૪૯૦/૮૦-૯૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 490/80-92..

Proofread by PSA Easwaran

*Sharmavatikritam Parvati Stotram 8*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*